CELEBRATING HER

1. अर्धो वा एष आत्मनो यत् पत्नी - तैत्तिरीयसंहिता 6-1-8-5
2. अर्धो वा एष आत्मनो यज्जाया - शतपथब्राह्मणम् 5-2-1-10 , 8-7-2-3
3. पत्युर्नो यज्ञसंयोगे (पत्नी) - पाणिनिसूत्रम् , 4-1-33
4. (दम्पत्योः सहाधिकारात् ) स्ववतोस्तु वचनादैककर्म्यं स्यात् - पूर्वमीमांसा - 6-1-4-17
5. धर्मे चार्थे च कामे च नातिचरितव्या पाणिग्रहणात्तु सहत्वं कर्मसु तथा पुण्यफलेषु द्रव्यपरिग्रहेषु च , आपस्तम्बगृह्यसूत्रम्
6. त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी।
   त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवति विश्वतोमुखात् ,

   श्वेताश्वतरोपनिषत् , 4-3
7. अरुन्धती -- ...हा वत्से !
   शिशुर्वा शिष्या वा यदसि मम तत्तिष्ठतु तथा
   विशुद्धेरुत्कर्षस्त्वयि तु मम भक्तिं द्रढयति।
   शिशुत्वं स्त्रैणं वा भवतु ननु वन्द्यासि जगतां
   गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः॥ उत्तररामचरितम् , 4-11
8. कृताभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीमधीतिनीम् ।
   दिदृक्षवस्तामृषयो’भ्युपागमन् न धर्मवृद्धेषु वयस्समीक्ष्यते ॥ कुमारसंभवम् , 5-13
9. पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
   पुत्राश्च वार्धके वयसि न स्त्री स्वातन्त्र्यमर्हति ॥ मनुस्मृतिः, 9-3 ( protection for ladies always)
10. उत्तमं स्वार्जितं वित्तं मध्यमं पितुरार्जितम् ।
   अधमं भ्रातृवित्तं च स्त्रीवित्तमधमाधमम् ॥ पञ्चतन्त्रम्

11.यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।

यत्रैतास्तु न पूज्यन्ते सर्वस्तत्राफलाः क्रियाः॥ मनुस्मृतिः , 3-56

12.शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलम् ।

न शोचन्ति तु यत्रैताः वर्धते तद्धि सर्वदा ॥ ibid , 3-57

13.जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः।

तानि कृत्याहतानीव विनश्यन्ति समन्ततः ॥ ibid , 3-58

14.तस्मादेतास्सदा पूज्याः भूषणाच्छादनाशनैः।

भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च ॥ ibid , 3-59

15. स्त्रियां तु रोचमानायां सर्वं तद्रोचते कुलम् ।

तस्यां त्वरोचमानायां सर्वमेव न रोचते ॥ ibid , 3-62

16. अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् ।

शौचे धर्मे'न्नपक्त्यां च पारिणाह्यस्य वेक्षणे ॥ ibid , 9-11

17.त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती \\

ऊर्ध्वं तु कालादेतस्मात् विन्देत सदृशं पतिम् ॥ ibid , 9-90

18. उपाध्यायान् दशाचार्यः आचार्याणां शतं पिता ।

सहस्रं तु पितृन् माता गौरवेणातिरिच्यते ॥ ibid , 2-145

19.परपत्नी तु या स्त्री स्यात् असंबन्धा च योनितः।

तां ब्रूयात् भवतीत्येवं सुभगे भगिनीति च ॥ ibid, 2-129

20. मातृदेवो भव पितृदेवो भव आचार्यदेवो भव - शिक्षावल्ली, तैत्तिरीयोपनिषत्